শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী পার্থসারথিদাসেন কৃতা

॥ শ্রী শ্রীনিৱাসস্তুতিঃ ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

শ্রী রঙ্গরামানুজ মহাদেশিকন্

His Holiness śrīmad āṇḍavan śrīraṅgam

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

॥ শ্রী শ্রীনিৱাসস্তুতিঃ ॥

ভক্তাভীষ্টপ্রদাতারং জগন্মঙ্গলৱিগ্রহম্।
শ্রীকল্যাণপুরাধীশং শ্রীনিৱাসমহং ভজে॥ **1**॥

ঊর্ধ্ৱপুণ্ড্রশিরোরত্নং রত্নহাররিভূষিতম্।
লোকরক্ষৈকদীক্ষঞ্চ শ্রীনিৱাসমহং ভজে॥ **2**॥

অজ্ঞানতিমিরাপোহং তেজোময়সুৱিগ্রহম্।
কলিকল্মষপাপঘ্নং শ্রীনিৱাসমহং ভজে॥ **3**॥

মোক্ষসাংরাজ্যদাতারং কাৱেরীতটকল্পকম্।
শ্রীভূমিসহিতং ৱন্দে শ্রীনিৱাসমহং ভজে॥ **4**॥

শ্রীমঙ্গলপুরাধীশং শ্রীৱৎসাঙ্কিতৱক্ষসম্।
ভক্তার্তিভঞ্জনোদ্যুক্তং শ্রীনিৱাসমহং ভজে॥ **5**॥

শঙ্খচক্রগদাহস্তং রত্নকুণ্ডলমণ্ডিতম্।
ৱজ্রোর্ধ্ৱ পুণ্ড্রজ্ৱলিতং শ্রীনিৱাসমহং ভজে॥ **6**॥

দ্বিনদীমধ্যগং দেৱং কল্যাণপুরনাযকম্।
দেৱর্ষিগণসম্পূজ্যং শ্রীনিৱাসমহং ভজে॥ **7**॥

সালগ্রামময়ীং ভৱ্যাং মালাং রত্নৱিভূষিতাম্।
ধারযন্তং দযাপূর্ণং শ্রীনিৱাসমহং ভজে॥ **8**॥

শ্রোণর্ক্ষমকরে মাস উদ্বাহোৎসৱশোভিনম্।
অলর্মেল্নাযিকাশ্লিষ্টং শ্রীনিৱাসমহং ভজে॥ **9**॥

আজানুবাহুসুভগং কমলাযতলোচনম্।
রত্নহাটককেযূর ভূষণৈর্ভূষিতং ভজে॥ **10**॥

দ্বিনদীসেৱিতং শ্রীশং ব্রহ্মরুদ্রাদিসেৱিতম্।
জিতকন্দর্পসৌন্দর্যং শ্রীনিৱাসমহং ভজে॥ **11**॥

কল্যাণোৎসৱকালেষু ৱেদঘোষেণ হর্ষিতম্।
সঙ্গীতরসিকং শ্রীশং শ্রীনিৱাসমহং ভজে॥ **12**॥

অভীপ্সিতপ্রদানেন প্রার্থনাপূরণোৎসুকম্।
কেশৱং হেমপট্টাভং শ্রীনিৱাসমহং ভজে॥ **13**॥

রুদ্রমুক্তিপ্রদং ভক্তপ্রার্থনাপূরণোৎসুকম্।
দ্বিজারোহণসন্তুষ্টং শ্রীনিৱাসমহং ভজে॥ **14**॥

কালক্ষেপকথাৱাগ্ভিঃ পরিতুষ্টঃ শ্রিযঃ পতিঃ।
শ্রীনিৱাসো দীনবন্ধুঃ ভূযান্নঃ শ্রেযসে সদা॥ **15**॥

শিৱাৱনসমর্থায শ্রীভূসংশ্লেষতোষিণে।
সর্ৱদাঽভযহস্তায নিত্যশ্রীর্নিত্যমঙ্গলম্॥ **16**॥

কলিপ্রত্যক্ষদেৱায শ্রিতকল্প মহীরুহে।
কলিনাশন দক্ষায শ্রীনিৱাসায মঙ্গলম্॥ **17**॥

গোৱিন্দগানতুষ্টায গীর্ৱাণেশার্চিতাঙ্ঘ্রযে।
গিরিসপ্তকনাথায শ্রীনিৱাসায তে নমঃ॥ **18**॥

ভক্তরক্ষণশীলায জগন্মোহনমূর্তযে।
শ্রীকল্যাণপুরেশায শ্রীনিৱাসায মঙ্গলম্॥ **19**॥

পার্থসারথিদাসেন কৃতেযং ভক্তিপূর্ৱিকা।
সর্ৱৈশ্ৱর্যপ্রদাত্রী চ শ্রীনিৱাসস্তুতির্ভৱেৎ॥ **20**॥

॥ শ্রী শ্রীনিৱাসস্তুতিঃ সমাপ্তা ॥